"चित्तस्योपशमोऽयं वै कविभिः शास्त्रचक्षुषा। दर्शितः सुगमो योगो धर्म्मश्चात्मसुदावहः ॥")

सुगहनः, त्रि, (सुन्दरो गहनः।) निविड़ः। इत्यमरटीकायां रामाश्रमः ॥

सुगहना, स्त्री, कुम्बा। सुगहनेतिविशेषणमिति केचित्। नाम इत्यन्ये। इत्यमरटीकायां रमानाथः ॥

सुगहनावृत्तिः,स्त्री,कुम्बा। इत्यमरः ॥ यज्ञस्थाने अस्पृश्यादिदर्शनवारणाय या सुगहना निरवकाशा वृतिर्वेष्टनं सा कुम्बा। इति भरतः ॥

सुगृहः, पुं, (सुन्दरं गृहं यस्य।) चञ्चुसूचिकपक्षी। इति हेमचन्द्रः ॥ (सुन्दरं गृहम्।) सुन्दरालये, क्ली ॥

सुगृहीतः, त्रि, (सु + ग्रह + क्तः।) सुन्दररूपेण कृतग्रहणः ॥

सुगृहीतनामा,[न्] पुं, (सुगृहीतं नाम यस्य।) शुभकाम्यया प्रातः स्मर्य्यते यः। स च युधिष्ठिरादिः। इति त्रिकाण्डशेष. ॥

सुग्रन्थिः, पुं, (शोभना ग्रन्थयो यत्र।) चोरकः। इति राजनिर्घण्टः ॥ सुन्दरग्रन्थियुक्ते, त्रि ॥

सुग्रीवः, पुं, (शोभना ग्रीवा यस्य। विष्णोरश्वः। (यथा, महाभारते। २। २। १४।
"प्रययौ पुण्डरीकाक्षः शैव्यसुग्रीववाहनः ॥")
शाखामृगेश्वरः। इति मेदिनी ॥ स तु सूर्य्यपुत्त्रः किष्किन्धाधिपतिः श्रीरामचन्द्रस्य सखा यथा, वाल्मीकीये रामायणे बालकाण्डे १७ सर्गे।
"वानरेन्द्रं महेन्द्राभमिन्द्रो वालिनमात्मजम्। सुग्रीवं जनयामास तपनस्तपतां वरः ॥"
किञ्च तत्रैव किष्किन्धाकाण्डे ५ सर्गे।
"दीप्यमानं ततो वह्निं पुष्पैरभ्यर्च्य सत्कृतम्। तयोर्मध्ये तु सुप्रीतो निदधौ सुसमाहितः ॥ ततोऽग्निं दीप्यमानं तौ चक्रतुश्च प्रदक्षिणम्। सुग्रीवो राघवश्चैव वयस्यत्वमुपागतौ ॥"*॥
अर्हत्पिता। स च वर्त्तमानयुगीयनवमजिनपिता। इति हेमचन्द्रः ॥ शिवः। इन्द्रः। राजहंसः। असुरः। पर्व्वतविशेषः। अस्त्रविशेषः। नागभेदः। इति केचित् ॥ शोभनग्रीवायुक्ते, त्रि। इति विश्वः ॥

सुग्रीवी, स्त्री, (शोभना ग्रीवा यस्याः। ङीप्।) ताम्राग्रभजाता कश्यपदुहिता। यथा,—
"षट् सुतास्तु महासत्त्वास्ताम्रायाः परिकीर्त्तिताः।
शुकी श्येनी च भासी च सुग्रीवी शुचिगृध्रिका शुकी शुकानजनयत् उलूकी प्रत्युलूककान्। श्व्यौदकान् पक्षिगणान् सुग्रीवी तु व्यजायत॥"
इति गारुड़े ६ अध्यायः ॥

सुग्रीवेशः, पुं, (सुग्रीवस्य ईशः।) श्रीरामचन्द्रः। इति शब्दरत्नावली ॥

सुग्लः, त्रि, (सुग्लायतीति। सु + ग्लै + "आतश्चोपसर्गे।"३।१।१३६। इति कः।)अत्यन्तहर्षक्षयविशिष्टः। इति सिद्धान्तकौमुदी ॥

सुचक्षुः, [स्] पुं, (शोभनं चक्षुरिव फलं यस्य।) उडुम्बरः। इति जटाधरः ॥ शोभनलोचने, क्ली ॥ तद्युक्ते, त्रि ॥

सुचञ्चुका, स्त्री, (सुष्ठु चञ्चुरिव शिखा यस्याः। कप्।) महाचञ्चुशाकः। इति राजनिर्घण्टः ॥

सुचरित्रा, स्त्री, (शोभनं चरित्रं यस्याः।) साध्वी। इत्यमरः।२।६।६ ॥ शोभनचरित्रयुक्ते, त्रि ॥

सुचर्म्मा, [न्] पुं, (शोभनं चर्म्म यस्य।) भूर्जवृक्षः। इति राजनिर्घण्टः ॥ शोभनचर्म्मविशिष्टे, त्रि ॥

सुचारुः, त्रि, (शोभनश्चारुश्च।) मनोहरः। यथा, कालिकापुराणोक्तदशभुजादुर्गाध्याने।
"सुचारुदशनां तद्वत् पीनोन्नतपयोधराम् ॥"

सुचित्रकः,पुं, (सुन्दराणि चित्राणि यत्र।) मत्स्यरङ्कः। चित्रसर्पः। इति शब्दरत्नावली ॥ सुन्दरचित्रयुक्ते, त्रि ॥

सुचित्रबीजा, स्त्री, सुचित्रं बीजं यस्याः।) विड़ङ्गा। इति राजनिर्घण्टः ॥

सुचित्रा, स्त्री, (शोभनानि चित्राणि यस्याः।) चिर्भिटा। इति राजनिर्घण्टः ॥

सुचिरायुः, [स्]पुं, (सुचिरं आयुर्यस्य।)देवता। इति शब्दरत्नावली ॥

सुचुटी,स्त्री, अग्न्याद्युद्धरणार्थलौहादियन्त्रविशेषः चिमटा इति भाषा। इति केचित् ॥

सुचेलकः, पुं, (शोभनश्चेलकः।) शोभनवस्त्रम्। सरु कापड़ इति भाषा। तत्पर्य्यायः। पटः २ इत्यमरः। २। ६। ११६ ॥ पटिः ३ पटी ४। इति तट्टीका ॥ सुन्दरवस्त्रयुक्ते, त्रि ॥

सुच्छत्री,स्त्री, शतद्रुनदी। इति शब्दरत्नावली ॥ शतलज इति ख्याता ॥

सुजनः, पुं, (सु सुन्दरो जनः। साधुः। सज्जनः। यथा,—
"दुर्ज्जनस्य हि सङ्गेन सुजनोऽपि विनश्यति। प्रसन्नं जलमित्याहुः कर्द्दमैः कलुषीकृतम् ॥"
इति गारुड़े १५ अध्यायः ॥

सुजनता, स्त्री, (सुजनस्य भावः। तल्। टाप्।) सौजन्यम्। यथा,—
"धिगस्त्वेतां विद्यां धिगपि कवितां धिक्सुजनतां वयो रूपं वा धिक् धिगपि च यशो निर्धनवताम्।
असौ जीयादेकः सकलगुणहीनोऽपि धनवान् बहिर्यस्य द्वारे तृणलवसमाः सन्ति गुणिनः ॥"
इत्युद्भटः ॥

सुजलं, क्ली, (शोभनं जलं यस्मात्। कमलम्। इति राजनिर्घण्टः ॥ सुन्दरसलिलञ्च ॥ सुन्दरजलसम्बन्धिनि, त्रि ॥

सुजल्पः, पुं, (सुन्दरो जल्पः कथनम्।) वाक्यविशेषः। यथा,—
"यत्रार्ज्जवात् सगाम्भीर्य्यं सदैन्यं सहचापलम् सोत्कण्ठञ्च हरिः पृष्टः स सुजल्पो निगद्यते ॥"
इत्युज्ज्वलनीलमणिः ॥

सुजाता, स्त्री,(सु + जन + क्तः।) तुवरी। इति राजनिर्घण्टः ॥

सुजीवन्ती, स्त्री, (सुजीवतीति। सु + जीव + शतृ। ङीप्।) स्वर्णजीवन्ती। इति राजनिर्घण्टः ॥

सुट्ट, क तीक्ष्ण्ये। अनादरे। इति कविकल्पद्रुमः (चुरा०-पर०-सक०-सेट्।) पञ्चमस्वरी टइयान्तः। क,सुट्टयति। दन्त्यादिरयमिति भीमः। तीक्ष्ण्यमक्षोभः। इति दुर्गादासः ॥

सुतः, पुं, (सूयते स्मेति। सु + क्तः।) पुत्त्रः। इत्यमरः। २। ६। २७ ॥ "सूयते सुतः कर्म्मणि क्तः। पुतो नरकभेदात् त्रायते इति पुत्त्रः। 'पुन्नाम्नो नरकाद्यस्मात् पितरं त्रायते सुतः। तस्मात् पुत्त्र इति ख्यातः स्वयमेव स्वयम्भुवा।'
इति स्मृतिः ॥
किंवा पुनाति मातापितराविति त्रासुविति त्रे निपातात् ह्रस्वत्वे पुत्रः। पुत्त्रो द्वितकारः एकतकारश्च।" इत्यमरटीकायां भरतः ॥ * ॥ मातृपितृस्वभाववत्स्वभावे सुतकन्ये भवतः। यथा,—
"शीलं संभजते पुत्त्रो मातुस्तातस्य वै सुता। यथाशीला भवेन्माता तथाशीलो भवेत् सुतः ॥ यद्वर्णा वै भवेद्भूमिस्तद्वर्णं सलिलं भवेत् ॥ मातॄणां शीलदोषेण पितृशीलगुणेन च। विभिन्नास्तु प्रजाः सर्व्वा भवन्ति भवशीलिनाम् ॥"
इति वह्निपुराणे काश्यपीयवंशः ॥
पार्थिवः। इति मेदिनी ॥*॥ (उत्पन्ने, त्रि ॥)

सुतजीवकः,पुं, (सुतं जीवयतीति। जीव + ण्वुल्) पुत्त्रजीवकवृक्षः। इति राजनिर्घण्टः ॥

सुतनुः, स्त्री, (शोभना तनुर्यस्याः।) नारी। इति राजनिर्घण्टः ॥ (शोभना तनुः शरीरम्।) शोभनशरीरम् ॥ तद्युक्ते, त्रि ॥ (यथा,उत्तरचरिते १ अङ्के।
"स्मरसि सुतनु ! तस्मिन् पर्व्वते लक्ष्मणेन प्रतिविहितसपर्य्यासुस्थयोस्तान्यहानि ॥")

सुतपाः, [स्] पुं, (सुष्ठु तपतीति। सु + तप् + "गतिकारकयोःपूर्व्वपदप्रकृतिस्वरत्वम्।"उणा० ४।२२६। इति असिः।) सूर्य्यः। इति सिद्धान्तकौमुदी ॥ शोभनं तपो यस्य। मुनिः ॥ (रौच्यमनुपुत्त्रविशेषः। इति मार्कण्डेयपुराणम्।९४। २५॥ विष्णुः। इति महाभारतम्। १३। १४९। ३४ ॥ उग्रतपस्यायुक्ते, त्रि। यथा, कथासरित्सागरे। ११२। १४१।
"स एव जातः संकल्पदोषाद्राक्षकुले द्विजः। भार्य्यास्य सा च सुतपा जातैषा तं सुता नृप॥")

सुतपादिका, स्त्री, (सुताः समकालीनसुत्पन्नाः पादाः मूलानि यस्याः। कप्। टापि अत इत्वम्।) हंसपदी। इति राजनिर्घण्टः ॥

सुतरां,व्य,(सु + द्विवचनविभज्येत्यादिना तरप्।) अवधारितार्थप्रतिपादकम्। यथा। क्रियैव काल इति मते तु सुतरां नाधिकरणता। इति